**Sadvidya** Journal of Sanskrit and Indian Knowledge Systems
DOI: 10.18311/sadvid/2024/49902

# व्युत्पत्तिवादोक्तदिशा भूमिं गच्छति न महीरुहं इति वाक्यस्य प्राचीननवीननैय्यायिकमतमनुसृत्य वाक्यार्थविचारः।

**Ajimon C. S. and Mary Tessy T. G.**

Associate Professor, Dept. of Nyaya, Govt. Sanskrit College, Thiruvananthapuram – 695034, Kerala; csajimon@gmail.com

Asst. Professor, Dept. Of Sanskrit, Maharajas College, Ernakulam – 682011, Kerala; tesgeorgetg@gmail.com

## प्रबन्धसारः

द्वितीया विभक्त्यर्थे धात्वर्थे च प्राचीननवीननैय्यायिकानां मध्ये मतभेदः अस्ति। द्वितीयायाः फलमात्रमर्थःधातोस्तु व्यापारः एवार्थः इति प्राचीननैय्यायिकाः वदन्ति।नवीनाः फलावच्छिन्नव्यापारः धात्वर्थःद्वितीयायाः आधेयता एवार्थः इति वदन्ति। पक्षद्वयेपि विविधप्रयोगेषु कथं साधुत्वमिति विषये अनेकाः आशङ्काः सन्ति।ताः आशङ्काः अत्र प्रदर्श्य विचारः क्रियते।तथापि प्रधानतया भूमिं गच्छति न महीरुहं इति प्रयोगसंबद्धाः आशङ्काः अत्र विचार्यन्ते।

**कुञ्चीशब्दाः:** कर्मत्वं, आधेयता, वृत्तिनियामकः, वृत्यनियामकः, प्रतियोगिता, जनकत्वसंबन्धः।

## प्रस्तावना

श्रीगदाधरभट्टाचार्येण विरचितः ग्रन्थः भवति व्युत्पत्तिवादः। विशिष्टा उत्पत्तिः व्युत्पत्तिः। व्युत्पत्तीनां वादः व्युत्पत्तिवादः। आचार्यः ग्रन्थे अस्मिन् कारकाणां विस्तरेण प्रतिपादनं करोति। अत्र द्वितीयाध्याये द्वितीयाकारकमधिकृत्य विस्तरेण प्रतिपादनं अस्ति। अस्मिन् अध्याये प्राचीननवीननैय्यायिकानां मते धात्वर्थादिकं किमिति विचारः प्रचलति।कर्मणि द्वितीया इति सूत्रस्य कर्मत्त्ववाचिका द्वितीया इत्यर्थः इति आदौ आचार्येण उच्यते।[1] कर्मत्वं च क्रियाजन्यफलशालित्वं। कर्मप्रत्ययस्य फलमात्रमर्थः।क्रियातुधातुलभ्यमेव।कर्मत्त्वस्यधात्वर्थगमनादौ जलकत्वसंबन्धेन अन्वयति। प्राचीननैय्यायिकानां मते व्यापारः एव धात्वर्थः। द्वितीयायाः फलमात्रमेवार्थः इति तेषां आशयः। अत्र प्राचीनमते ग्रामं त्यजति इत्यत्रापि धात्वर्थव्यापारे संयोगजनकत्वं प्रतीयेत इति सर्वत्र सर्वप्रतीत्यापत्तिः स्याद् इति नवीननैय्यायिकानां आक्षेपः। किन्तु तन्न समीचीनमिति प्राचीनाः वदन्ति। सामान्यतः फलविषयकशाब्दबोधं प्रति कर्मप्रत्ययस्य कारणत्वेपि फलविशेषविषयकशाब्दबोधं प्रति धातुविशेषजन्यव्यापारोपस्थितेरेव हेतुत्वमित्यतः उक्ताक्षेपाः न संभवन्ति।[2] अतः ग्रामं त्यजति इति वाक्यात् ग्रामनिष्ठसंयोगजनकव्यापारस्य बोधः नैव भवेत् इति प्राचीनाः। आकाङ्क्षाविरहात् ग्रामं गच्छतीतिवत् ग्रामं स्पन्दते इत्यादयो न प्रयोगाः। अन्वयबोधौपयिकसमभिव्याहारस्यैव आकाङ्क्षात्वं न तु केवलसमभिव्याहारस्य। फलान्वितव्यापारबोधकधातुत्वस्यैव सकर्मकत्वव्यवहारः इति स्पन्द् धातोः न सकर्मकत्वं।

## नव्यनैय्यायिकमते धात्वर्थः द्वितीयाविभक्त्यर्थः च

नवीननैय्यायिकमते फलविशेषावच्छिन्नव्यापारः धात्वर्थः।[3] जनकत्वसंबन्धेन संयोगादिरूपफलविशिष्टत्वं फलविशेषावच्छिन्नत्वं । फलविशेषावच्छिन्नव्यापारस्य धात्वर्थत्वात् विभागादि तात्पर्येण ग्रामं गच्छति इत्यादि प्रयोगापत्तिः नास्ति। तत्तद्धात्वर्थतावच्छेदकफलशालित्वमेव तत्तद्धातुकर्मत्वं इत्यतः गम् धातु कर्मत्वं उत्तरदेशस्यैव न तु पूर्वदेशस्य। नव्यमते स्पन्द् धातोः सकर्मकत्वव्यवहारः अपि नास्ति यतः तत्र फलस्य धात्वर्थतानवच्छेदकत्वात् ।[4] एवं नव्यमते द्वितीयाविभक्तेः वृत्तिः अथवा आधेयता एवार्थः।

ननु द्वितीयायाः आधेयत्वार्थकत्वे कर्मणि द्वितीया इत्यनुशासनविरोधः स्याद् इति न च वाच्यं- तस्य सूत्रस्य फलनिष्ठाधेयत्वान्वयिनि प्रकृति तात्पर्ये तदुत्तरं द्वितीया इत्येवार्थः।अतः न उक्ताक्षेपः संभवति।[5] तत्र कर्मणि इत्यत्र कर्म

*Author for correspondence

Article Received on: 15.10.2024 *Peer-reviewed* Accepted on: 06.12.2024

पदस्य आधेयत्वमित्यर्थस्वीकारे अस्य सूत्रस्य शक्तिग्राहकत्वं न संभवतीति चेत् न अनादितात्पर्यग्रहसंपादकत्वेन परंपरया शक्तिग्राहकत्वं संभवतीति नव्याः।[6]

## भूमिं गच्छति न महीरुहं इत्यत्र प्राचीनमते शाब्दबोधानुपपत्तिः इत्याक्षेपः।

अत्र नवीनाः प्राचीनमते भूमिं गच्छति न महीरुहं इति वाक्यात् शाबदबोधः उपपादयितुं न शक्यते इति आक्षिपन्ति। अत्र कारणं तु प्राचीनमते द्वितीया विभक्तेः फलं इत्येवार्थः खलु, फलस्य तु धात्वर्थे व्यापारे एव अन्वयः। एवं ग्रामं गच्छति इत्यत्र ग्रामवृत्तिसंयोगजनकव्यापारवान् इति शाब्दबोधः प्राचीनमते। ननु भूमिं गच्छति न महीरुहं इत्यत्र महीरुहवृत्तिसंयोगस्य जनकत्वसंबधेन गमनव्यापारे अभावो वक्तव्यः। अत्र जनकत्वसंबन्धावच्छिन्नप्रतियोगिताकमहीरुहवृत्तिसंयोगस्याभावरूपः नञर्थः वक्तुं न शक्यते इति नवीनानां आक्षेपः। संबन्धः द्विविधः वृत्तिनियामकः वृत्यनियामकः चेति। यस्मिन् संबन्धे प्रतियोग्यनुयोगिनोः परस्परं आधाराधेयभावः प्रतीयते सः संबन्धःवृत्तिनियामकः। यत्र तु संबन्धे आधाराधेयभावः न प्रतीयते सः संबन्धः वृत्यनियामकः। अत्र जनकत्वसंबन्धावच्छिन्नप्रतियोगिताक अभावः अप्रसिद्धः एव। यतः जनकत्वसंबन्धः वृत्यनियामकः भवति। वृत्यनियामकसंबन्धस्य तु अभावप्रतियोगितावच्छेदकत्वं नास्ति। अतः जनकत्वसंबन्धावच्छिन्नप्रतियोगिताकमहीरुहवृत्तिसंयोगाभावः अप्रसिद्धः इत्यतः तादृशबोधो नैव स्यादिति नव्याः। तस्मात् भूमिं गच्छति न महीरुहं इत्यत्र कथं वाक्यार्थबोधः उपपादयितुं शक्यते।

## भूमिं गच्छति न महीरुहं इत्यत्र नवीनमतम्।

नव्यमते तु द्वितीयार्थः आधेयत्वमेव। अतः नञा द्वितीयार्थाधेयत्वस्य संयोगादिरूपफलनिष्ठो अभावः बोध्यते।[7] आधेयत्वं तु संयोगे आश्रयतासंबन्धेन अन्वयति। आश्रयता संबन्धः वृत्तिनियामकः भवति इत्यतः तस्य अभावप्रतियोगितावच्छेदकत्वं अस्ति। अतः नव्यमते भूमिं गच्छति न महीरुहं इत्यत्र शाब्दबोधः उपपादयितुं शक्यते।

अत्र भूमिं गच्छति न महीरुहं इत्यत्र नञर्थः जनकत्वसंबन्धेन संयोगाभावो न। किन्तु भूमिकर्मकगमनकर्तरि समवायेन महीरुहकर्मकगमनव्यापारकर्तृत्त्वाभावः एव नञा बोध्यते। अतः तादृशकर्तृत्वाभावः एव नञर्थः। अतः वृत्तिनियामकः समवायः एव अभावप्रतियोगितावच्छेदकः संबन्धः इत्यतः प्राचीनमते न कोपि दोषः इति तेषां आशयः। किन्तु तन्न समीचीनमिति नव्याः। यतः कर्तृवाचकपदसत्त्वे तत्पदोपस्थितकर्तरि उक्तकर्तृत्त्वाभावः बोधयितुं शक्यते। किन्तु यत्र कर्तृवाचकपदं नास्ति तत्र उक्तरीत्या कर्तृत्वाभावः वक्तुं न शक्यते। इत्थं प्राचीनमते भूमिं गच्छति न महीरुहं इत्यत्र शाब्दबोधानुपपत्तिः अपरिहार्यो भवति इति नव्याः।

ननु कर्तृवाचकपदाभावे यथा आख्यातार्थस्य व्यापारस्य अन्वयार्थं कर्तृवाचकपदं अध्याह्रियते तथा अध्याहृतपदोपस्थितकर्तरि महीरुहकर्मकगमनकर्तृत्वाभावः बोधयितुं शक्यते इति भूमिं गच्छति न महीरुहं इत्यत्र न वाक्यार्थानुपपत्तिः इति प्राचीनाः वदन्ति। किन्तु तन्न समीचीनमिति नव्याः। कर्तृवाचकपदाभावस्थले सर्वत्र तदाध्याहारः कर्तव्यः इति नियमो नास्ति। यतः क्वचित् व्यापारविशेष्यकः अपि शाब्दबोधः संभवति। यथा भूमेर्गमनं न महीरुहस्य इत्यादौ। अत्र प्रथमान्तगमनपदवाच्यव्यापारविशेष्यक शाब्दबोधः जायते। अतः कर्तृवाचकपदाभावस्थले तदाध्याहारः कर्तव्यः इति नियमाभावात् जनकत्वसंबन्धावच्छिन्नप्रतियोगिताकसंयोगाभावः एव उक्तस्थले प्राचीनानां वक्तुं शक्यते इति तत्र वाक्यार्थानुपपत्तिः तथैव इति नवीनाः। किं च भूमेर्गमनं न महीरुहस्य इत्यत्र कृद्योगे कर्मणि षष्ठी इत्यनेन षष्ठ्याः द्वितीया समानार्थकत्वं प्राप्तं। तत्रापि द्वितीया समानार्थकषष्ठ्यर्थस्य अभावो अत्र नञा बोधनीयः। तत्रापि यदि संयोगादिरूपफलमेव द्वितीयार्थः तर्हि संयोगाभावस्य व्यापारे जनकत्वसंबन्धेन अन्वयः कर्तव्यः। तदा वृत्यनियामकस्य जनकत्वसंबन्धस्य अभावप्रतियोगितानवच्छेदकत्वात् तथा अन्वयो न शक्यते। अतः द्वितीयार्थः आधेयता इति स्वीकारः एव उचितमित्यतः फलस्य द्वितीयार्थत्वं

न युक्तं इति नवीनाः। ननु भूमेर्गमनं न महीरुहस्य इत्यत्र गमनव्यापाराभाव एव नञा प्रतीयते न तु षष्ठ्यर्थाभावः इति उच्यते चेत् तदपि न संभवति। यतः अत्र अनुयोगिनःअभावात्। अत्र अनुयोगिनः व्यापारकर्तुरुपस्थितिरेव नास्ति इति कथं गमनाभावः अन्वयेत्। पदार्थान्वयः कश्चिमंश्चित् अधिकरणे एव कर्तुं शक्यते । अनुयोगिनं विना नञा अभावबोधकत्वं अप्रामाणिकमेव।

## नव्यनैय्यायिकैः उक्तानाम् आक्षेपाणां समाधानम्।

अत्र प्राचीनाः समाधानं वदन्ति-" न वृत्यनियामकसंबन्धस्य अभावप्रतियोगितावच्छेदकत्त्वे दोषः कः?"8 इति। तन्मते वृत्यनियामकसंबन्धस्य अभावप्रतियोगितावच्छेदकत्त्वं संभवत्येव। अतः भूमिं गच्छति न महीरुहं इत्यत्र जनकत्वसंबन्धावच्छिन्नप्रतियोगिताकसंयोगाभावःप्रतीयते तत्र न कोपि दोषः। एवं प्राचीनमते द्वितीयायाः फलमेवार्थः। ननु संयोगजनकत्वाभावः उभयवादि सिद्धः एव। तदतिरिक्तस्य जनकत्वसंब-

न्धावच्छिन्नप्रतियोगिताकसंयोगाभावस्य स्वीकारे गौरवदोषः आरोप्यन्ते नवीनैः। किन्तु तन्न समीचीनं। जनकत्वसंबन्धावच्छिन्नसंयोगाभावस्य संयोगजनकत्वाभावसमनियतत्त्वेन तस्यैव स्वरूपत्वात् न अतिरिक्तसंयोगाभावस्वीकाररूपः गौरवः। तथापि जनकत्वसंबन्धावच्छिन्नप्रतियोगिताकसंयोगाभावस्य संयोगजनकत्वाभावस्वरूपत्त्वात् अतिरिक्तसंयोगाभावकल्पनारूपगौरवाभावेपि संयोगजनकत्वाभावीयप्रतियोगितातो जनकत्वसंबन्धावच्छिन्नप्रतियोगिताकसंयोगाभावीयप्रतियोगितायाः अतिरिक्तायाः कल्पने प्राचीनमते गौरवमस्तीति चेत् अस्तु उक्तगौरवं। तथापि द्वितीयायाः आधेयत्वं धातोः च फलावच्छिन्नव्यापारः इत्यर्थस्वीकुर्वतां नवीननैय्यायिकमते ये दोषाः सन्ति तादृश दोषाः प्राचीनमते न सन्ति इति नव्यसिद्धान्तमपेक्ष्य बहुविधलाघवः अत्र वर्तते इति अतिरिक्तप्रतियोगिताकल्पनारूपगौरवः तुच्छः एवेति प्राचीनाः वदन्ति। एवं भूमिं गच्छति न महीरुहम् इत्यत्र जनकत्वसंबन्धावच्छिन्नप्रतियोगिताक महीरुहानुयोगिकसंयोगाभाववद्व्यापारवज्जलम् इति शाब्दबोधः।

## पादटिप्पणी

1. कर्मणि द्वितीया इत्यनुशासनात् कर्मत्वं द्वितीयार्थः, तत्र कर्मपदस्य धर्मपरत्वात्, सप्तम्याः वाचकतार्थकत्वात्। व्युत्पत्तिवादः-द्वितीयाकारकप्रथमखण्डः, पृष्ठः- 207.
2. फलविशेषान्वयबोधे च धातुविशेषजन्यव्यापारोपस्थितेहेतुतया ग्रामं त्यजति इत्यादौ धात्वर्थस्पन्दे ग्रामनिष्ठविभागजनकत्वमेव ग्रामं गच्छति इत्यादौ च धात्वर्थस्पन्दे ग्रामनिष्ठसंयोगजनकत्वमेव प्रतीयते न तु विपरीतम्।- व्युत्पत्तिवादः-द्वितीयाकारकप्रथमखण्डः, पृष्ठः- 208.
3. नव्यास्तु संयोगादिरूपफलविशेषावच्छिन्नस्पन्दो गम्याद्यर्थः। व्युत्पत्तिवादः-द्वितीयाकारकप्रथमखण्डः, पृष्ठः- 215.
4. न वा स्पन्दे सकर्मकत्वं- तत्र फलस्य धात्वर्थतानवच्छेदकत्वात्। व्युत्पत्तिवादः-द्वितीयाकारकप्रथमखण्डः, पृष्ठः- 216.
5. न च कर्मणि द्वितीया इत्यनुशासनविरोधः – तस्य कर्मणि फलनिष्ठाधेयत्वान्वयिनि प्रकृति तात्पर्ये तदुत्तरं द्वितीयेत्यर्थकत्त्वात्। व्युत्पत्तिवादः-द्वितीयाकारकप्रथमखण्डः, पृष्ठः- 216.
6. न चैवं तस्य शक्तिग्राहकत्वानुपपत्तिः –अनादितात्पर्यग्रहसंपादकत्वेन परंपरयाशक्तिग्राहकत्वसंभवात्। व्युत्पत्तिवादः-द्वितीयाकारकप्रथमखण्डः, पृष्ठः- 216.
7. नव्यमते तु द्वितीयार्थस्याधेयत्वस्य फलनिष्ठो अभावः एव तथेति नानुपपत्तिः। व्युत्पत्तिवादः-द्वितीयाकारकप्रथमखण्डः, पृष्ठः- 224.

## सहायकग्रन्थाः


1. आर्यादेवि टि. (1997). शब्दप्रमाणविचारः, सपर्या पब्लिकेषन्स् त्रिश्शूर्.
2. गदाधरभट्टाचार्यः (2011). व्युत्पत्तिवादः, राष्ट्रियसंस्कृतसंस्थानं मानितविश्वविद्यालयः, नवदेहली.
3. गदाधरभट्टाचार्यः (1970) शक्तिवादः, श्रीवेंकटेश्वरस्टीम् यन्त्रालयः, बंबई।
4. जगदीशतर्कालङ्कारः (1973) शबदशक्तिप्रकाशिका, चौखम्भा संस्कृत सीरीज्, वाराणसी।
5. रामानुजताताचार्यः (2005) शाब्दबोधमीमांसा,ऐ. एफ् पि.
6. रामानुजताताचार्यः (1995) शब्दलक्षणप्रामाण्यविमर्शः, राष्ट्रियसंस्कृतसंस्थानं मानितविश्वविद्यालयः, नवदेहली.